# श्रीदेवराजगुरुभिरनुगृहिता
# पूर्वदिनचर्या

## Poorva Dinacharya

सौम्यजामातृयोगीन्द्रचरणाम्बुजषट्पदम् ।
देवराजगुरुं वन्दे दिव्यज्ञानप्रदं शुभम् ॥
अङ्के कवेरकन्यायास्तुङ्गे भुवनमङ्गले ।
रङ्गे धाम्नि सुखासीनं वन्दे वरवरं मुनिम् ॥१ ॥
मयि प्रविशति श्रीमन्मन्दिरं रङ्गशायिनः ।
पत्युः पदाम्बुजं द्रष्टुमायान्तमविदूरतः ॥२ ॥
सुधानिधिमिव स्वैरस्वीकृतोदग्रविग्रहम् ।
प्रसन्नार्कप्रतीकाशप्रकाशपरिवेष्टितम् ॥३ ॥
पार्श्वतः पाणिपद्माभ्यां परिगृह्य भवत्प्रियौ ।
विन्यस्यन्तं शनैरङ्घ्री मृदुलौ मेदिनीतले ॥४॥
आम्लानकोमलाकारमाताम्रविमलाम्बरम् ।
आपीनविपुलोरस्कमाजानुभुजभूषणम् ॥५ ॥
मृणालतन्तुसन्तानसंस्थानधवलत्विषा ।
शोभितं यज्ञसूत्रेण नाभिबिम्बसनाभिना ॥६ ॥
अम्भोजबीजमालाभिरभिजातभुजान्तरम् ।
ऊर्ध्वपुण्ड्रैरुपश्लिष्टमुचितस्थानलक्षणैः ॥७ ॥
काश्मीरकेसरस्तोमकडारस्निग्धरोचिषा ।
कौशेयेन समिन्धानं स्कन्धमूलावलम्बिना ॥८ ॥
मन्त्ररत्नानुसन्धानसन्ततस्फुरिताधरम् ।
तदर्थतत्वनिध्यानसन्नद्धपुलकोद्गमम् ॥९ ॥
स्मयमानसुखाम्भोजं दयमानदृगञ्चलम् ।
मयि प्रसादप्रवणं मधुरोदारभाषणम् ॥१० ॥
आत्मलाभात्परं किञ्चिदन्यन्नास्तीति निश्चयात् ।
अङ्गीकर्तुमिव प्राप्तमकिञ्चनमिमं जनम् ॥११ ॥
भवन्तमेव नीरन्ध्रं पश्यन्वश्येन चेतसा ।

मुने ! वरवर ! स्वामिन् मुहुस्त्वामेव कीर्तयन् ॥ १२ ॥

त्वदन्यविषयस्पर्शविमुखैरखिलेन्द्रियैः ।

भवेयं भवदुःखानामसह्यानामानास्पदम् ॥ १३ ॥

परेद्युः पश्चिमे यामे यामिन्यास्समुपस्थिते ।

प्रबुध्य शरणं गत्वा परां गुरुपरम्पराम् ॥ १४

ध्यात्वा रहस्यत्रितयं तत्वयाथात्म्यसर्पणम् ।

परव्यूहादिकान् पत्युः प्रकारान् प्रणिधाय च ॥ १५ ॥

ततः प्रत्युषसि स्नात्वा कृत्वा पौर्वाह्णिकीः क्रियाः ।

यतीन्द्रचरणद्वन्द्वप्रवणेनैव चेतसा ॥ १६ ॥

अथ रङ्गनिधिं सम्यगभिगम्य निजं प्रभुम् ।

श्रीनिधानं शनैस्तस्य शोधयित्वा पदद्वयम् ॥ १७ ॥

ततस्तत्सन्निधिस्तम्भमूलम्भूतलभूषणम् ।

प्राङ्मुखं सुखमासीनं प्रसादमधुरस्मितम् ॥ १८ ॥

भृत्यैः प्रियहितैकाग्रैः प्रेमपूर्वपासितम् ।

तत्प्रार्थनानुसारेण संस्कारान् संविधाय मे ॥ १९ ॥

अनुकम्पापरीवाहैरभिषेचनपूर्वकम् ।

दिव्यं पदद्वयं दत्त्वा दीर्घम् प्रणमतो मम ॥ २० ॥

साक्षात्फलैकलक्ष्यत्वप्रतिपत्तिपवित्रितम् ।

मन्त्ररत्नं प्रयच्छन्तं वन्दे वरवरं मुनिम् ॥ २१ ॥

ततस्सार्धम् विनिर्गत्य भृत्यैर्नित्यानपायिभिः ।

श्रीरङ्गमङ्गलं द्रष्टुं पुरुषं भुजगेशयम् ॥ २२ ॥

महतिं श्रीमति द्वारे गोपुरं चतुराननम् ।

प्रणिपत्य शनैरन्तः प्रविशन्तं भजामि तम् ॥ २३ ॥

देवी गोदा यतिपतिश्शठद्वेषिणौ रङ्गश्टङ्ग

सेनानाथो विहगवृषभश्श्रीनिधिस्सिन्धुकन्या ।

भूमानिलागुरुजनवृतः पुरुषश्चेत्यमीषामग्रे

नित्यं वरवरमुनेरङ्घ्रियुग्मं प्रपद्ये ॥ २४ ॥

मङ्गलाशासनं कृत्वा तत्रतत्र यथोचितम् ।

धाम्नस्तस्माद्विनिष्क्रम्य प्रविश्य स्वं निकेतनम् ॥ २५ ॥

अथ श्रीशैलनाथार्यनाम्नि श्रीमति मण्डपे ।
तदङ्घ्रिपङ्कजद्वन्द्वच्छायामध्यनिवासिनाम् ॥ २६ ॥
तत्त्वं दिव्यप्रबन्धानां सारं संसारवैरिणाम् ।
सरसं सरहस्यानां व्याचक्षाणां नमामि तम् ॥ २७ ॥
ततः स्वचरणाम्भोजस्पर्शसम्पन्नसौरभैः ।
पावनैरर्थिनरतीर्थैर्भावयन्तं भजामि तम् ॥ २८ ॥
आराध्य श्रीनिधिं पश्चादनुयागं विधाय च ।
प्रसादपात्रं मां कृत्वा पश्यन्तं भवयामि तम् ॥ २९ ॥
ततश्चेतस्समाधाय पुरुषे पुष्करेक्षणे ।
उत्तंसितकरद्वन्द्वमुपविष्टमुपह्वरे ॥ ३० ॥
अब्जासनस्थमवदातसुजातमूर्तिम्
आमीलिताक्षमनुसंहितमन्त्ररत्नम् ।
आनम्रमौलिभिरुपासितमन्तरङ्गै
नित्यं मुनिं वरवरं निभृतो भजामि ॥ ३१ ॥
ततस्शुभाश्रये तस्मिन्निमग्नं निभृतं मनः ।
यतीन्द्रप्रवणं कर्तुम् यतमानं नमामि तम् ॥ ३२ ॥

इति पूर्वदिनचर्या समाप्ता ॥